# Yudhishthirakritam 2 Shri Krishna Stotram

# યુધિષ્ઠિરકૃતં ૨ શ્રીકૃષ્ણસ્તોત્રમ્

## Document Information

Text title : Yudhishthirakritam 2 Shri Krishna Stotram

File name : yudhiShThirakRRitaM2shrIkRRiShNastotram.itx

Category : vishhnu, vishnu, krishna, mahAbhArata, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : mahAbhArata | shAntiparva | adhyAya 43/3-16||

Latest update : November 2, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 2, 2025

*sanskritdocuments.org*

# યુધિષ્ઠિરકૃતં ૨ શ્રીકૃષ્ણસ્તોત્રમ્

તવ કૃષ્ણ પ્રસાદેન નયેન ચ બલેન ચ ।
બુદ્ધ્યા ચ યદુશાર્દૂલ તથા વિક્રમણેન ચ ॥ ૨॥

પુનઃ પ્રાપ્તમિદં રાજ્યં પિતૃપૈતામહં મયા ।
નમસ્તે પુણ્ડરીકાક્ષ પુનઃ પુનરરિન્દમ ॥ ૩॥

ત્વામેકમાહુઃ પુરુષં ત્વામાહુઃ સાત્વતાં પતિમ્ ।
નામભિસ્ત્વાં બહુવિધૈઃ સ્તુવન્તિ પરમર્ષયઃ ॥ ૪॥

વિશ્વકર્મન્નમસ્તેઽસ્તુ વિશ્વાત્મન્વિશ્વસમ્ભવ ।
વિષ્ણો જિષ્ણો હરે કૃષ્ણ વૈકુણ્ઠ પુરુષોત્તમ ॥ ૫॥

અદિત્યાઃ સપ્તરાત્રં તુ પુરાણે ગર્ભતાં ગતઃ ।
પૃશ્નિગર્ભસ્ત્વમેવૈકસ્ત્રિયુગં ત્વાં વદન્ત્યપિ ॥ ૬॥

શુચિશ્રવા હૃષીકેશો ઘૃતાર્ચિર્હંસ ઉચ્યસે ।
ત્રિચક્ષુઃ શમ્ભુરેકસ્ત્વં વિભુર્દામોદરોઽપિ ચ ॥ ૭॥

વરાહોઽગ્નિર્બૃહદ્ભાનુર્વૃષણસ્તાર્ક્ષ્યલક્ષણઃ ।
અનીકસાહઃ પુરુષઃ શિપિવિષ્ટ ઉરુક્રમઃ ॥ ૮॥

વાચિષ્ઠ ઉગ્રઃ સેનાનીઃ સત્યો વાજસનિર્ગુહઃ ।
અચ્યુતશ્ચ્યાવનોઽરીણાં સઙ્કૃતિર્વિકૃતિર્વૃષઃ ॥ ૯॥

કૃતવર્ત્મા ત્વમેવાદ્રિર્વૃષગર્ભો વૃષાકપિઃ ।
સિન્ધુક્ષિદૂર્મિસ્ત્રિકકુત્રિધામા ત્રિવૃદચ્યુતઃ ॥ ૧૦॥

સંરાડ્વિરાટ્સ્વરાટ્ચૈવ સુરરાડ્ધર્મદો ભવઃ ।
વિભુર્ભૂરભિભૂઃ કૃષ્ણઃ કૃષ્ણવર્ત્મા ત્વમેવ ચ ॥ ૧૧॥

સ્વિષ્ટકૃદ્ભિષગાવર્તઃ કપિલસ્ત્વં ચ વામનઃ ।
યજ્ઞો ધ્રુવઃ પતઙ્ગશ્ચ જયત્સેનસ્ત્વમુચ્યસે ॥ ૧૨॥

શિખણ્ડી નહુષો બભ્રુર્દિવસ્પૃક્ત્વં પુનર્વસુઃ ।
સુબભ્રુરુક્ષો રુક્મસ્ત્વં સુષેણો દુન્દુભિસ્તથા ॥ ૧૩॥

ગભસ્તિનેમિઃ શ્રીપદ્મં પુષ્કરં પુષ્પધારણઃ ।
ઋભુર્વિભુઃ સર્વસૂક્ષ્મસ્ત્વં સાવિત્રં ચ પઠ્યસે ॥ ૧૪॥

અમ્ભોનિધિસ્ત્વં બ્રહ્મા ત્વં પવિત્રં ધામ ધન્વ ચ ।
હિરણ્યગર્ભં ત્વામાહુઃ સ્વધા સ્વાહા ચ કેશવ ॥ ૧૫॥

યોનિસ્ત્વમસ્ય પ્રલયશ્ચ કૃષ્ણ ત્વમેવેદં સૃજસિ વિશ્વમગ્રે ।
વિશ્વં ચેદં ત્વદ્વશે વિશ્વયોને નમોઽસ્તુ તે શાર્ઙ્ગચક્રાસિપાણે ॥ ૧૬॥

ઇતિ મહાભારતે શાન્તિપર્વણિ ૪૩ અધ્યાયાન્તર્ગતં
યુધિષ્ઠિરકૃતં શ્રીકૃષ્ણસ્તોત્રં સમ્પૂર્ણમ્ ।

મહાભારત । શાન્તિપર્વ । અધ્યાય ૪૩/૩-૧૬॥

mahAbhArata . shAntiparva . adhyAya 43/3-16..

Proofread by PSA Easwaran

*Yudhishthirakritam 2 Shri Krishna Stotram*

pdf was typeset on November 2, 2025

Please send corrections to *sanskrit@cheerful.com*